Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २०८
सप्टेम्बर - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

✍ सतीशः गज्जर्

### कूर्मस्य पृष्ठे शशस्य यात्रा

सूर्यः प्रतिदिनम् उदयति । तेन सह विज्ञानम् अपि उदयति । विज्ञानस्य वेगः विलक्षणः वर्तते । अद्य क्रीतं प्रत्येकं नूतनं वस्तु अपरस्मिन् दिवसे पुरातनं भवति । बहुवारं विक्रेतारः मादृशान् पुरातनमानसान् ग्राहकान् उद्दिश्य सकटाक्षं वदन्ति – 'जमाने के साथ चलो !' परन्तु मनुष्यजातिः स्वभावतः एव प्रगतेन विज्ञानेन सह चलितुं समर्था नैव भवति। कालस्य हस्तेन ताडितः दुर्बलः मनुष्यः शीघ्रं नूतनं घटीयन्त्रं क्रेतुं शक्नोति। परन्तु तस्मै समयपालनस्य शिक्षणं कः दास्यति ? विज्ञानेन दत्तानाम् उपकाराणां ग्रहणम् अर्थात् विज्ञानेन निर्दिष्टैः नियमैः सह सुतरां चलनम्। तत् वयं यथोचितं कर्तुं शक्नुमः ? उदाहरणैः ज्ञातुं प्रयत्नं कुर्मः। विज्ञानेन मनुष्याय गतिः दत्ता। वेगवता यानेन सः ईप्सिते काले स्वस्थानं प्राप्नुयात् इति प्रयोजनं तस्य। मनुष्यः तत् यानं संयमेन चालयितुं शक्नुयात् चेत् विज्ञानम् उपकारकं भवेत्। परन्तु तथा न भवति। स्थाने स्थाने जायमानाः दुर्घटनाः तस्य उदाहरणाय अलम्। विज्ञानं गतिं दत्त्वा विरमति। किन्तु कौशलस्य प्राप्तिः मनुष्यस्य उत्तरक्रिया वर्तते । विज्ञानं व्यवस्थां दास्यति, विवेकं न दास्यति इति निश्चितम् । यत्र केवला व्यवस्था वर्तते तत्र विज्ञानम् अभिशापः भवति। विज्ञानेन सह चलनम् अधर्मः नास्ति। भगवान् श्रीरामः अपि पुष्पकस्य उपयोगं कृतवान्। अद्यतनः कृष्णः चक्रधारी नापि भवेत्। आधुनिकः चाणक्यः पुरातनम् अर्थशास्त्रं धृत्वा आगमिष्यति ? पाणिनिः सङ्गणकस्य उपयोगं न करिष्यति ? विज्ञानस्य उद्देश्यं जीवनस्य सुचारु परिवर्तनं वर्तते। तत् उचितं ननु। तथापि, यदा विज्ञानं पाकशालां प्रविशति तदा गृहिण्याः मानसी स्थितिः अपि परिवर्तेत इति अपेक्षा भवति। पुरातनी गृहिणी नूतनायां पाकशालायां पक्तुं न शक्नोति । अद्य दन्तकाष्ठस्य स्थाने दन्तकूर्चं दन्तानां सेवां करोति । दन्तकाष्ठं प्रशस्यतरम् इति वयं जानीमः। तथापि दन्तकूर्चस्य विज्ञानसम्मतम् उपयोगं वस्तुतः कति जनाः जानीयुः ? विज्ञानवृत्तिः उपस्थिता चेत् दन्तकूर्चम् उपकारकं भवति, नो चेत् दन्तकाष्ठम् अपि हानिकरं भवति । उपकरणेन सह वृत्तेः अपि परिवर्तनम् आवश्यकम् । कृषिक्षेत्रे महत् परिवर्तनं इति वयं चिन्तयामः । वैज्ञानिकैः उपकरणैः बहूनि श्रमसाध्यानि कार्याणि सरलानि भवन्ति । अत्र विज्ञानस्य अपेक्षा वर्तते यत् नूतनेन हलेन सह हली (कृषकः) अपि नूतनेन स्वरूपेण प्रकटीभवेत्। पुरातनेन हलिना नूतना कृषिः कथं सम्भवेत् ? शशः कच्छपस्य पृष्ठे उपवेष्टुं शक्नोति, किन्तु सः यथेष्टं गतिं प्राप्तुं न शक्नोति। विज्ञानम् अपि उचितं भोक्तारं प्रतीक्षते। पञ्चतन्त्रकारेण लिखितः अयं श्लोकः शेषं साधयतु –

**अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।**
**पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥**

# दयालुता

पुष्पपुरनामके ग्रामे पुरुषोत्तमो नाम कश्चन वणिक् निवसति स्म। तस्य पुत्रस्य नाम मुरारिः इति। मुरारिः परमदयालुः। सः तरुणः जातः अस्ति इदानीम्।

कदाचित् सः क्रीडितुं गतः। तदवसरे तस्य मित्रस्य युतकं छिन्नं जातम्। तत् मित्रं निर्धनम् आसीत्। 'मम एकमात्रं युतकम् अपि छिन्नम् इत्यतः कथम् अहं गृहं गच्छानि ?' इति वदता उच्चैः रोदनं कृतं तेन। अतः दयालुः मुरारिः स्वस्य युतकम् अपनीय तस्मै दत्त्वा विना युतकम् एव गृहम् आगतवान्। एतत् ज्ञातवान् पुरुषोत्तमः पुत्रं भृशं तर्जयित्वा अवदत् – ''वणिजि एतादृशः दयागुणः सर्वथा न शोभते। भवता अग्रे वणिग्वृत्तिः आश्रीयते एव। अतः स्वस्य स्वभावः परिवर्तनीयः भवता'' इति।

तदा पुरुषोत्तमस्य पत्नी अवदत् – ''किम् एतादृशेन तर्जनेन ? वणिजि करुणागुणस्य आधिक्यं न शोभते इति तु सत्यम्। किन्तु तर्जनेन स्वभावः न परिवर्तते। तदर्थं योग्यस्य गुरोः समीपम् एतं नयतु। सः एतस्मिन् विवेकं जागरयितुं प्रयासं कुर्यात्'' इति।

पुरुषोत्तमः पत्न्याः वचनं युक्तम् अमन्यत। अतः सः पुत्रेण सह पण्डितस्य सुशर्मणः गृहं गतवान्। मुरारेः स्वभावविषये सर्वम् उक्त्वा पुरुषोत्तमः अवदत् – ''पञ्चतन्त्रे विष्णुशर्मा राजकुमारेषु यथा विवेकं जागरितवान् तथा भवता अपि मम पुत्रे विवेकः जागरणीयः। तेन वृत्त्यन्तरं तु करणीयं नास्ति। वणिग्वृत्तेः अनुसरणेन एव तस्य जीवनं सुखमयं भवितुम् अर्हति। तत्र एतदीयः दयागुणः एव बाधकः अस्ति'' इति।

तदा सुशर्मा मन्दहासपूर्वकम् अवदत् – ''पुरुषोत्तमवर्य ! दया कश्चन उत्तमः गुणः। सर्वेषु मानवेषु सः भवेत् अपि। किन्तु सा दया स्थाने भवेत्, न तु अस्थाने। अचिरात् एव अहम् एतं विवेकिनं करिष्यामि। भवान् चिन्तां मा करोतु'' इति।

तस्मात् दिनात् मुरारिः प्रतिदिनं सुशर्मणः गृहम् आगत्य विद्याभ्यासम् आरब्धवान्। कदाचित् सुशर्मा मुरारिम् उक्तवान् – ''वत्स ! महत्या श्रद्धया भवान् विद्याभ्यासं यत् करोति तेन अहं सन्तुष्टोऽस्मि। भवान् सुकोमलहृदयः। दयाकरुणादयः भवति आधिक्येन सन्ति। यस्मिन् दया प्रदर्शयितुम् इष्यते तस्य पात्रता आदौ परीक्षणीया। भाविनि काले भवान् पितुः वाणिज्यम् अनुवर्तयिष्यति। वाणिज्ये कौशलवाक्चातुर्यादयः एव प्रमुखाः भवन्ति। दया न वाणिज्यवर्धिका। अतः वाणिज्यस्य हानिः यथा न स्यात् तथा दया दर्शनीया भवता। अन्यथा भवान् जीवने कष्टम् अनुभवेत्'' इति।

तदा मुरारिः अवदत् – ''गुरुवर्य ! वाणिज्यं मम कुलवृत्तिः। दया मम जन्मजातः गुणः। एतयोः उभयोः अपि सामञ्जस्यं जीवने कथं कल्पनीयम् इति सर्वथा न अवगतं मया'' इति। ''स्वानुभवः एव तत् ज्ञापयति। तदस्तु, एषु दिनेषु वरदाचार्यः मह्यम् औषधं ददाति। भवान् तस्य गृहं गत्वा औषधम् आनयतु। कुतः आगतम् इति उक्तं चेत् सः औषधं ददाति'' इति।

मुरारिः वरदाचार्यस्य गृहं गत्वा आगमनकारणम् उक्तवान्। तदा वैद्यः अवदत् – ''औषधसज्जीकरणाय घण्टात्मकः कालः आवश्यकः भवेत्। सर्वेषां रोगिणां निर्गमनस्य अनन्तरम् अहं भवते औषधं ददामि'' इति।

चिकित्सार्थम् आगतान् रोगिणः उद्दिश्य वरदाचार्यः अवदत् – ''कश्चन पङ्गुः मूललतादिसङ्ग्रहणे मम साहाय्यं करोति । तस्य पिता नितराम् अस्वस्थः अस्ति । तस्य चिकित्सार्थं सुवर्णरेणुमिश्रितम् औषधं सज्जीकरणीयम्। महान् व्ययः भवति तस्य। यावत् मया दातुं शक्यते तावत् अहं ददामि। दयालवः भवन्तः अपि यथाशक्ति धनं दातुम् अर्हन्ति। सः पङ्गुः बहिः स्थितः अस्ति'' इति। एतत् श्रुतवतः मुरारेः हृदयं नितरां दयापूर्णं जातम्। सः बहिः गत्वा अपश्यत्। तत्र कश्चन सुदृढः पुरुषः दण्डसाहाय्येन स्थितः आसीत्।

सर्वेषां रोगिणां निर्गमनस्य अनन्तरं मुरारिः वरदाचार्यस्य समीपं गत्वा अवदत् – ''मम पिता गुरुश्च वदतः यत् दया न उचिता इति। किन्तु मम तु भाति यत् तयोः कथनं न युक्तम्। एतस्मै पङ्गवे दातुं मम समीपे धनं नास्ति। अतः अहं मम अङ्गुल्यां स्थितं सुवर्णाङ्गुलीयकम् एव दास्यामि। तस्यैव उपयोगेन औषधं निर्मातु भवान्'' इति।

तदा वरदाचार्यः उच्चैः हसन् बहिः दृष्टिं प्रसार्य 'वीरभद्र!' इति आह्वयत्।

एतत् श्रुत्वा बहिः स्थितः जनः दण्डं क्षिप्त्वा वेगेन अन्तः आगच्छत्। एतत् दृष्ट्वा मुरारिः नितराम् आश्चर्यान्वितः जातः। तदा वरदाचार्यः तस्य स्कन्धे हस्तं स्थापयन् अवदत् – ''मया एव एषा व्यवस्था कारिता आसीत्। इदानीं भवता ज्ञातं स्यात् यत् दयागुणस्य दुरुपयोगः कथं स्वीकरिष्यते लोके इति। एतत् अङ्गुलीयकं पित्रा प्रीतिपूर्वकं दत्तम् आसीत्। तदेव भवान् अन्यस्मै अपात्राय दातुम् उद्यतः आसीत्'' इति।

अङ्गीकारपूर्वकं शिरः इतस्ततः चालितवान् मुरारिः। तदा वरदाचार्यः पुनः अवदत् – ''औषधदानं मम वृत्तिधर्मः। एतत् अहं सम्यक् पालयामि। किन्तु कदाचित् असत्यमिश्रितः व्यवहारः अपि मया करणीयः भवति। भवतः गुरोः मातुः चिकित्सा एव अत्र उदाहरणम्। सा तु वृद्धा। वार्धक्यकारणतः शरीरदौर्बल्यं सहजम्। तत् शरीरदौर्बल्यं सा अस्वास्थ्यं मन्यते। अतः शक्तिवर्धकम् औषधं दत्त्वा अहं वदामि यत् एतत् अपूर्वम् औषधम्, एतस्य सेवनात् सर्वं सम्यक् भविष्यति इति। एतस्य श्रवणात् सा सन्तुष्टा भविष्यति। वाणिज्यम् अपि एतादृशम् एव। तस्यापि कानिचन रहस्यानि भवन्ति। तानि ज्ञातव्यानि भवता। कः दयार्हः, कश्च कपटः इति ज्ञात्वा एव भवता दया प्रदर्शनीया'' इति।

मुरारिः औषधम् आनीय गुरवे दत्त्वा अवदत् – ''गुरुवर्य! दयागुणस्य उपयोगः विना चिन्तनं न करणीयः इति इदानीं ज्ञातम् अस्ति मया। सत्पात्रे एव दया शोभते। के वञ्चकाः, के च दयार्हाः इति विवेकः जीवने अवश्यं स्यात्'' इति। मुरारौ जातं परिवर्तनं दृष्टवतः सुशर्मणः महान् सन्तोषः जातः। 'मम प्रयासः सफलः जातः वणिक् पुरुषोत्तमः निश्चयेन अस्ति भाग्यवान्' इति अचिन्तयत् सः।

## पञ्चरात्रम् ( ग्रन्थपरिचयः )

व्योम शाहः

यस्य कृतिसवितरि उदिते प्रथितयशसामपि महाकवीनां कृतितारकाः अपक्षीयन्ते, तस्य महाकवेः भासस्य नाटकचक्रात् 'पञ्चरात्रम्' इति नाम्ना प्रसिद्धस्य समवकारस्य रसास्वदनं कुर्मः।

**कृतिप्रकारः** – महाकविना विश्वनाथेन साहित्यदर्पणे निरूपितेषु दशसु रूपकेषु कृतिः इयं 'समवकारः' इति प्रकारेऽन्तर्भवति। समवकारे देवासुरसम्बन्धि प्रसिद्धं वृत्तं त्रिषु अङ्केषु वर्ण्यते। द्वादशानां नायकानां वर्णनमस्मिन् भेदे आवश्यकं, किन्तु सर्वेषाम् अपि नाटकीयदृष्ट्या पृथक् प्रयोजनं भवितव्यम्। रसेषु वीरः मुख्यः। यद्यपि वृत्तान्तः देवासुरसम्बन्धी न, तथाऽपि पात्राणि देवसदृशानि। रसस्तु वीरः एव मुख्यः। अयं व्यायोगः इति केषाञ्चिद् मतं, किन्तु विदुषां मते समवकारभेदः एव युक्ततरः।

**कृतेः मुख्या आधारसामग्री** – कृतेः मुख्यः आधारः महाभारतम् एव। महाभारते गोहरणस्य प्रसङ्गः प्राप्यते एव, किन्तु अन्यत् सर्वमपि कवेः मनःपरिकल्पितम्।

**कृतेः नामकरणम्** – पञ्चानां रात्रीणां समाहारः इति पञ्चरात्रम्। पञ्चसु रात्रिषु यदि अज्ञातवासगताः पाण्डवाः द्रोणेन प्राप्यन्ते तर्हि दुर्योधनस्तान् किञ्चित् राज्यं प्रददाति इति निश्चितम्। तस्मादेव कृतेः मुख्यं प्रसङ्गम् अधिकृत्य नामकरणं युक्तम्।

**समवकारे पात्राणि** – दुर्योधनः, भीष्मः, द्रोणः, कर्णः, शकुनिः, भटः, वृद्धगोपालकः, विराटः, भीमसेनः, ब्राह्मणरूपधारी युधिष्ठिरः, बृहन्नलारूपधारी अर्जुनः, अभिमन्युः, उत्तरः, कञ्चुकीयः इत्यादयः।

**कथासारः** – रूपकस्य प्रारम्भे सूत्रधारः प्रविश्य श्रीकृष्णस्य स्तुतिं कुरुते। पद्येन एकेन एव द्वादशपात्राणां नामोल्लेखः, व्यञ्जनया च तस्य ईश्वरस्तुतौ अर्थः प्रकटितः।

**''द्रौणः पृथव्यर्जुनभीमदूतो यः कर्णधारः शकुनीधरस्य।**
**दुर्योधनो भीष्मयुधिष्ठिरः स पायाद् विराडुत्तरगोऽभिमन्युः॥''**

सः ततः स्थितिम् उपस्थापयन् कुरुराज्यस्य दुर्योधनस्य यज्ञसमृद्धिं वर्णयित्वा निष्क्रान्तः।

विष्कम्भके त्रयः ब्राह्मणाः परस्परं संलापं कुर्वन्ति। ते दुर्योधनेन कृतस्य यज्ञस्य साफल्यं वर्णयन्तः अभिदधति यदनेन यज्ञेन निखिलं जगत् तृप्तम्। ते दुर्योधनस्य सौजन्यं तेन च कृतानि सत्कार्याणि प्रशंसन्ति।

नाट्यारम्भे भीष्मद्रोणौ परस्परं दुर्योधनस्य धार्मिकीं वृत्तिं स्तुतः। तदैव मञ्चं प्रति दुर्योधनः कर्णः शकुनिः च प्रविशन्ति। दुर्योधनः स्वर्गस्य प्रत्यक्षत्वं वर्णयति –

**''कृतश्रद्धो ह्यात्मा वहति परितोषं गुरुजनो**
**जगद् विश्वस्तं मे निवसति गुणो नष्टम् अयशः।**
**मृतैः प्राप्य स्वर्गो यदि कथयत्येतद् अनृतं**
**परोक्षो न स्वर्गो बहुगुणम् इहैवैष फलति॥''**

(क्रमशः... )

# मासवार्ता:

## आरब्ध: "Diploma in Sanskrit Teaching" अभ्यासक्रम:

संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं "Diploma in Sanskrit Teaching" इति अभ्यासक्रमं सञ्चालयति। एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ५ दिनाङ्के अभ्यासक्रमोऽयम् आरब्ध: वर्तते । २९ छात्रा: अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्त: । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्न: वर्तते । अभ्यासक्रमेऽस्मिन् छात्रा: जुलाईमासपर्यन्तं संस्कृतशिक्षकप्रशिक्षणं ग्रहीष्यन्ति।

## सम्पन्न: बालसंस्कृतवर्ग:

एकलव्य-संस्कृत-एकेडेमी, अमेरीका चेप्टरद्वारा अमेरीकादेशस्थानां बालानां कृते तेषां ग्रीष्मावकाशे बालसंस्कृतवर्गस्य आयोजनं कृतम् आसीत् । जूनमासस्य ७ दिनाङ्कात् आरभ्य अगस्तमासस्य २८ दिनाङ्कपर्यन्तं वर्गोऽयं सप्ताहे दिनत्रयं सोमवासरे, बुधवासरे, शुक्रवासरे च प्राचलत् । वर्गेऽस्मिन् छात्रा: श्लोकान्, मन्त्रान्, संस्कृतगीतानि, संस्कृतभाषां च अपठन्। श्रीमती सङ्गीता मिस्त्री छात्रेभ्य: मार्गदर्शनं प्रायच्छत्।

## आरब्ध: संस्कृतभाषाशिक्षणवर्ग:

संस्कृतं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य वर्गाणां नियतम् आयोजनं करोति। एतस्मिन् उपक्रमे सप्टेम्बरमासस्य ६ दिनाङ्कत: संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य आरम्भ: जात: वर्तते । प्रात: ७.०० वादनत: ८.३० वादनपर्यन्तम् अभ्यासक्रमस्य समय: वर्तते । अभ्यासक्रमोऽयं नवेम्बरमासस्य ३० दिनाङ्कपर्यन्तं संवर्तिष्यते।

## सम्पन्नौ संस्कृतभाषाशिक्षणस्य वर्गौ




संस्कृतभाषाया: अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतभाषाशिक्षणस्य विविधस्तरीया: अभ्यासक्रमा: आयोज्यन्ते । उपक्रमेऽस्मिन् जूनमासस्य ५ दिनाङ्कत: सप्टेम्बरमासस्य ६ दिनाङ्कपर्यन्तं संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य चतुर्थस्तरस्य च अभ्यासक्रम: प्राचलत् । अभ्यासक्रमेऽस्मिन् ३९ छात्रा: संस्कृतभाषाया: अध्ययनम् अकुर्वन् । डॉ. मिहिर: उपाध्याय: छात्रेभ्य: मार्गदर्शनं प्रायच्छत्।

## कृपया हसन्तु

**नमनः नापितस्य आपणे केशान् कर्तयित्वा रमणम् उद्दिश्य - "भोः रमण ! पश्य तव तुलनायाम् अहं दशवर्षाणि लघु अस्मि इति प्रतिभाति खलु ?"**

**रमणः - एतदपेक्षया त्वया मुण्डनमेव कारणीयम् आसीत् । तेन तव जन्म इदानीमेव जातम् अस्ति इति सर्वे अनुभवेयुः ।**

★ ★ ★ ★ ★

**रमणः नमनस्य गृहद्वारस्य उपरि शब्दम् अकरोत् । नमनः द्वारम् उद्घाट्य तत्र उपस्थितं रमणं दृष्ट्वा उच्चैः हास्यम् आरब्धवान् । एतत् दृष्ट्वा - "एवम् उच्चैः किमर्थं हसन् अस्ति ?" इति रमणः अपृच्छत् । तदा नमनः अवदत् - "कदापि कापि समस्या पुरतः दृश्यते तर्हि हसित्वा तस्याः स्वागतं कर्तव्यम्" इति मम गुरुः माम् उपदिष्टवान् आसीत् ।**

★ ★ ★ ★ ★

**पुत्रः - (पितरम् उद्दिश्य) भोः पितः ! रुग्णालयः अर्थात् किम् ?**

**पिता - यदा जनः पृथिव्याः स्वर्गं प्रति प्रयाणं करोति तदा प्रयाणमार्गे यत् करदानस्थानम् आगच्छति सः एव रुग्णालयः ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**पण्डिते हि गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।**
**तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥**

**तात्पर्यम्** – पण्डितेषु सर्वे गुणाः समन्विताः भवन्ति। एवं मूर्खेषु सर्वे दोषाः समन्विताः भवन्ति। अतः सहस्रमूर्खाणाम् अपेक्षया एकः विद्वान् विशिष्टः भवति।

**निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।**
**अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥**

**तात्पर्यम्** – नीतिनिपुणाः श्लाघन्ताम् उत निन्दन्तु, सम्पत्तिः प्राप्यताम् अथवा नष्टा भवतु, मरणम् अनुपदं भवतु, विलम्बेन वा भवतु – किन्तु धीराः कदापि विचलिताः न भवन्ति। कस्मिंश्चिदपि कठिनसन्दर्भे अपि न्याय्यं मार्गं न परित्यजन्ति।


**नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च ।**
**शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥**

**तात्पर्यम्** – ब्रह्मनिष्ठेन सम्पादनीयाः गुणसम्पत्तयः नाम निश्चलता, सर्वसमता, हितवचनं, नैतिकदार्ढ्यम्, स्थैर्यम्, अहिंसा, ऋजुः व्यवहारः, असकृत् आत्मावलोकनञ्च । एतेषु निश्चलता, सत्यवचनम्, ऋजुः व्यवहारः इत्यादीनां गुणानां प्रामुख्यं सर्वे सुलभतया ग्रहीतुं शक्नुवन्ति । आध्यात्मिकप्रगतौ अवश्यम् इति व्यासेन सूचितः 'उपरम' इत्येषः गुणः विशेषतया अवलोकनीयः । नैरन्तर्येण कार्यकरणं यावत् मुख्यं तावदेव मुख्यं भवति नियतम् आत्मावलोकनम्। तेन एव स्वस्य परिष्कारः शक्यः भवेत्, मनसः शान्तिः आसादिता भवेत् च।

## ज्ञानसरित्

श्यामः पटेलः

**जलम् एव विनापि जीवनम् !**



सर्वे जानन्ति यत् जलम् एव जीवनम् । प्रायः सस्तनप्राणिनः खाद्यम् इव जलमपि अपेक्षन्ते । किन्तु एतत् विश्वम् अचिन्त्यं कुतूहलं विदधाति । केचन प्राणिनः जलपानेन विनापि जीवन्ति । तेषां शारीरिकी रचना एव तादृशी भवति यया वातावरणतः ते जलं शोषयन्ति । तेषु अन्यतमः प्राणी अस्ति ओस्ट्रेलियादेशस्य 'ग्रेटर-बिल्बी'

'ग्रेटर-बिल्बी' आजीवनं जलं न पिबति । सः शशः इव दृश्यते । तस्य मुखम् ईषत् मूषकस्य मुखमिव भाति । शशस्य कर्णौ इव कर्णौ दधत् 'ग्रेटर-बिल्बी' रात्रौ एव भोजनम् अन्विष्यति । भस्मवर्णीयस्य अस्य लाङ्गुलं सुदीर्घं कृष्णवर्णीयं च भवति । एषः स्वस्य अग्रपादयोः नखैः भूमौ गभीरं खनित्वा द्वित्रैः प्रकोष्ठैः युक्तं बिलं निर्माय वसति । रात्रौ भोजनम् अन्विष्यतः ग्रेटर-बिल्बी इत्यस्य घ्राणशक्तिः श्रवणशक्तिश्च सुतीव्रा भवति । एषः वनस्पतिं लघून् जन्तून् च खादित्वा जलम् अपीत्वा एव जीवनं यापयति ।

एषः ओस्ट्रेलियादेशीयानां प्रियः प्राणी अस्ति । ते सप्टेम्बरमासस्य द्वितीयं रविवासरं राष्ट्रीय-बिल्बी-दिवसरूपेण सहर्षम् आचरन्ति ।

ईषत् – slightly, लाङ्गुलम् – tail

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **अहिः** | साँप | snake |
| **निबिडम्** | घना | dense |
| **लिपिः** | लिपि | script |
| **उद्दामः** | स्वतन्त्र | unbound |
| **निकरः** | समूह | group |
| **द्रविणम्** | धन | wealth |
| **कमला** | लक्ष्मीदेवी | goddess Lakshmi |
| **मत्सरः** | मत्सर | jealousy |
| **दिनमणिः** | सूर्य | sun |
| **कन्धरः** | ग्रीवा | neck |
| **कण्डोलः** | टोकरी | basket |
| **शलाका** | छोटी छडी | small stick |
| **सीमा** | सीमा | border |
| **सीरपाणिः** | बलदेव | Baldev |
| **सीसम्** | सीसा | lead |

## किं भवन्तः जानन्ति ?

**१ ) पाण्डवाः कस्य देवस्य अंशात् उत्पन्नाः ?**
(क) अग्नेः (ख) सूर्यस्य (ग) वायोः (घ) इन्द्रस्य

**२ ) इन्द्रः कस्याः दिशः लोकपालः वर्तते ?**
(क) पूर्व (ख) पश्चिम (ग) उत्तर (घ) दक्षिण

**३ ) दक्षिणपूर्वदिशोः लोकपालः कः वर्तते ?**
(क) यमः (ख) कुबेरः (ग) वरुणः (घ) अग्निः

**४ ) यमः कस्य दिशः लोकपालः वर्तते ?**
(क) दक्षिण (ख) पूर्व (ग) उत्तर (घ) पश्चिम

**५ ) ब्रह्मा कस्य नाभेः उत्पन्नः ?**
(क) गणेशस्य (ख) शिवस्य (ग) लक्ष्म्याः (घ) विष्णोः

**६ ) एतेषु कस्य सम्बन्धः जातककथाभिः सह वर्तते ?**
(क) बुद्धस्य (ख) महावीरस्य (ग) नानकदेवस्य (घ) चाणक्यस्य

**७ ) एतेषु कः चन्द्रगुप्तमौर्यस्य गुरुः आसीत् ?**
(क) बुद्धः (ख) अजातशत्रुः (ग) धनानन्दः (घ) चाणक्यः

उत्तराणि – (१) घ (२) क (३) घ (४) क (५) घ (६) क (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

## दीपावलीवर्गः

**(17 Nov 2023 to 25 Nov 2023)**

### संस्कृतव्याकरणम्

(Class 9-10)

8am to 9:30am

3000/-

### बालसंस्कृतवर्गः

(Class 1 to 8)

10am to 11:30am

2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 11/9/23 to 13/12/23
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Second Level

**Date :** 18/9/23 to 20/12/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

## स्तोत्रपाठः

**( मातृपूजनम्, शक्रादयस्तुतिः च )**

**Date :** 12/09/2023 to 12/10/2023
**Day :** Tuesday - Thursday
**Time :** 06:30 pm to 8:00 pm
**Fees :** Rs. 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006